शेषपापनिवर्तनेन ज्ञानप्रदात्रीमित्यर्थः । तमसां तमसानदीमवाप । लक्षणया तत्तीरं प्रापेत्यर्थः । अत्र तमसां तमसामिति व्यञ्जनत्रितयस्यावृत्त्या वृत्त्यनुप्रासः शब्दालंकारः । लक्षणं तूक्तम् ॥

**तत्र कंचन क्रौञ्चमिथुनादेकं पञ्चशरविद्धमपि व्याधेनानुविद्धं निध्यायतो बद्धानुकम्पस्य भगवतो वाल्मीकेर्वदनारविन्दाच्छन्दोमयी काचिदेवं निःससार सरस्वती ।**

**तत्रेति** । तत्र तमसातीरे । पञ्च शरा यस्य तेन पञ्चशरेण स्मरेण विद्धं प्रहृतम् । काममोहितमिति यावत् । 'कामः पञ्चशरः स्मरः' इत्यमरः । पञ्चभिः शरैर्विद्धमिति गम्यते । 'अरविन्दमशोकं च चूतं च नवमल्लिका । नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः ॥' इत्यमरः । तथाभूतमपि व्याधेन लुब्धकेन । निषादेनेति यावत् । 'व्याधो मृगवधाजीवो मृगयुर्लुब्धकश्च सः' इत्यमरः । अनु पश्चाद्विद्धं संप्रहृतम् । परमशोच्यतरमित्यर्थः । 'व्यध संप्रहारे' इति धातोः कर्मणि क्तः । क्रौञ्चमिथुनात्क्रौञ्ची च क्रौञ्चश्च क्रौञ्चौ बकविशेषौ । 'क्रुङ् क्रौञ्चोऽथ बकः कह्वः' इत्यमरः । 'पुमान्स्त्रिया' इत्येकशेषः । तयोर्मिथुनाद्द्वन्द्वात् । तन्मिथुनादित्यर्थः । निर्धारणे पञ्चमी । 'स्त्रीपुंसौ मिथुनं द्वन्द्वम्' इत्यमरः । कंचनैकं पुमांसं निध्यायतः पश्यतः । 'निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्' इत्यमरः । अत एव बद्धानुकम्पस्योत्पन्नकरुणस्य । मैत्रीं मुदिता करुणा उपेक्षा चेति चतसृणां महच्चित्तवृत्तित्वेन । विद्धवेदनदर्शनस्य करुणोत्पादकत्वादिति भावः । 'कृपा दयानुकम्पा स्यात्' इत्यमरः । भगवतो वाल्मीकेः । पदद्वयं व्याख्यातम् । वदनमरविन्दमिवेत्युपमितसमासः । न तु वदनमेवारविन्दमिति रूपकसमासः । तथा सत्यरविन्दस्य प्राधान्येन तस्मात्सरस्वतीनिःसरणायोगात् । छन्दोमय्यनुष्टुप्छन्दोनिबद्धा । 'द्वात्रिंशदक्षरानुष्टुभ्' इति छान्दसाः । छन्दःशब्दात्ताद्रूप्ये मयट् । 'टिड्ढाणञ्–' इत्यादिना ङीप् । काचिदपूर्वैवं वक्ष्यमाणप्रकारा सरस्वती वाग्निःससार निजप्रयत्नं विनैव निर्जगाम । 'गीर्वाग्वाणी सरस्वती' इत्यमरः । 'सृ गतौ' इति धातोर्लिट् ॥

तामेव सरस्वतीमाह—

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ ६ ॥**

**मा निषादेति** । हे निषाद, त्वं शाश्वतीः समा अनन्तसंवत्सरान् । 'संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समाः' इत्यमरः । अत्यन्तसंयोगे द्वितीया । प्रतिष्ठां स्थितिमागमो मा प्राप्नुहि । क्षिप्रमेव म्रियस्वेत्यर्थः । गमेर्लुङि पुषादित्वाच्च्लेरङादेशः । 'न माङ्योगे' इत्यडागमप्रतिषेधे वक्तव्येऽप्यार्षत्वात्तदभावप्रतिषेधः । यद्यस्मात्क्रौञ्चमिथुनादेकं काममोहितं क्रीडातत्परमवधीर्हतवानसि । हन्तेर्लुङि हनो वधादेशः । अयं

---

१. 'पञ्चशरशरानुविद्धम्' इति पाठः.

शापलेन प्रवृत्तः श्लोकः । वाल्मीकेर्महर्षेरीश्वरानुग्रहेण कृत्स्नकाव्यार्थसंग्रहो निःसृतः । संग्रहश्चायम्—मानिपाद मा लक्ष्मीर्निषीदति तिष्ठत्यस्मिन्निति मानिपाद लक्ष्मीनिवास श्रीराम, त्वं शाश्वतीः समाश्चिरकालं प्रतिष्ठामगमः । अखण्डितैश्वर्यानन्दसंपन्नो विजयी भवेत्यर्थः । यद्यतः कारणात्क्रौञ्चमिथुनात् 'कुञ्च गतिकौटिल्याल्पीभावयोः' इति धातोः कुञ्चा राक्षसी कैकसी तस्या अपत्यं क्रौञ्चो राक्षसो रावणः । 'तस्यापत्यम्' इत्यण् । तस्य पत्नी क्रौञ्ची मन्दोदरी । अत्रापि पूर्ववदेकशेषः । तयोर्मिथुनादेकं काममोहितं लोकविद्विष्टकर्माणं रावणमवधीः । एतेन महर्षिणा वाल्मीकिना संप्रदायप्रवर्तकेन लक्ष्मीपतिरूपश्रीरामस्मरणरूपं मङ्गलं काव्यादाववश्यं कर्तव्याशीर्वचनं कृतमित्यवगन्तव्यम् । इत्येवं सरस्वती निःससारेति पूर्वेण संबन्धः । श्लोकाख्यमेतदानुष्टुभं वृत्तम्—'पञ्चमं लघु सर्वेषु सप्तमं द्विचतुर्थयोः । गुरुषष्ठं च सर्वेषामेतच्छ्लोकस्य लक्षणम् ॥' इति वचनात् । 'मानिषाद प्रतिष्ठां त्वमगमः' इत्यत्र 'प्रतिष्ठां तु अम गमः' इति च्छेदः । न विद्यते मा यस्येति विग्रहः । तस्य संबुद्धिर्हे अम निर्भाग्य । इति नारायणीये ॥

**तदनु समयोचितकृत्यं निर्वर्त्य[1] स्वाश्रमं प्रति गतवति भगवति वाल्मीकौ ।**

**तदन्विति ।** तदनु 'मा निषाद' इत्यादिच्छन्दोनिबद्धवाङ्निःसरणानन्तरम् । भगवति पूज्ये वाल्मीकौ । समयोचितं मध्याह्नकालोचितम् । 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः । कृत्यं स्नानसंध्यावन्दनादि कर्म निर्वर्त्य कृत्वा स्वाश्रमं स्वनिकेतनं पर्णशालां प्रति गतवति प्रविष्टे सति ।

ततः किं प्रवृत्तमित्यत आह—

**वाणीविलासमपरत्रकृतोपलम्भ-**
**मम्भोजभूरसहमान इवाविरासीत् ।**
**आभाति यत्कृतिरनेकविधप्रपञ्च-**
**व्याजेन्द्रजालविधिसाधकपिञ्छिकेव[2] ॥ ७ ॥**

**वाणीति ।** अम्भोजं नारायणनाभीकमलं तत्र भवतीत्यम्भोजभूर्ब्रह्मा । तदुक्तं भागवते—'यन्नाभिजातादरविन्दकोशाद्ब्रह्माविरासीद्यत एष लोकः' इति । 'अन्येभ्योऽपि दृश्यते' इति क्विप् । अपरत्र पुरुषान्तरे वाल्मीकौ कृतोपलम्भं विहितानुपङ्गम् । तत्रोपलभ्यमानमित्यर्थः । वाण्याः 'मा निषाद' इत्यादिवाचः । सरस्वतीदेव्याश्चेति गम्यते । विलासं लीलामसहमानोऽमृष्यमाण इवाविरासीत्प्रादुरभूत् । निजपरिग्रहस्य पुरुषान्तरासक्तिं को वा सहेतेति भावः । वस्तुतस्तु परमकारुणिकतया महर्षेर्वाल्मीकेर्व्याधविद्धक्रौञ्चदर्शनानन्तरजनितशोकापनोदनार्थं निजाज्ञया प्रथमतो नारदोक्तमेवार्थं पुनः स्वयमभ्युपदेष्टुं तत्समक्षं प्रत्यक्षोऽभूदिति तात्पर्यम् । युक्तं चैतदित्याह—आभातीति । यत्कृतिर्यस्याम्भोजभुवः कृतिः क्रियाशक्तिः कर्त्री । अनेकविधो देवतिर्यङ्मनुष्यादिभेदेन

१. 'स्वाश्रममुपगतवति सति' इति पाठः. २. 'पिञ्छिकेव' इति पाठः.